त्रिविक्रमपण्डितविरचितस्य पंचायुधप्रपंचभाणस्य चिकित्सात्मकमध्ययनम्

(Critical edition and study of paṃcāyudhaprapaṃcabhāṇa of trivikrama paṇḍita)

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य

विद्यावारिधि इत्युपाधये

करिष्यमाणस्य शोधकार्यस्य शोधप्रस्तावसंक्षिप्तिका

शोधच्छात्रः

टि. सुधेशः भट्ट

मार्गदर्शकः

प्रो. परागः जोशी

संस्कृतभाषा-साहित्यविभागः

विभागाध्यक्षः – आधुनिकभाषाविभागः

संस्कृतभाषा-साहित्यविभागः

संस्कृतं तथा संस्कृतेतरभाषासङ्कायः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेकम् (महाराष्ट्रम्)

२०२४ - २०२५

त्रिविक्रम पण्डितविरचितस्य पंचायुधप्रपंचभाणस्य चिकित्सात्मकमध्ययनम्

(Critical edition and study of paṃcāyudhaprapaṃcabhāṇa of trivikrama paṇḍita)

प्रास्ताविकम् -

दृश्यकाव्ये भाणः –

स्वीकृतशोधकार्येस्मिन् रूपकेषु अन्यतमस्य भाणस्य मातृका अध्ययनार्थं स्वीक्रियते अतो प्रस्तावनायाम् आदौ भाणस्य परिचयः दीयते तदनु मातृकामहत्वं निरूप्यते।

'शब्दार्थयोर्यथावत्सहभावेन विद्या साहित्यविद्या'

इत्थं कविः राजशेखरः स्वग्रन्थे काव्यमीमांसे साहित्यविद्यायाः विषये वदति।

यत्र शब्दार्थयोः सहभावः विद्यते सा साहित्यविद्या इति।

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।

करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥[१]

चतुर्विध पुरुषार्थ सिध्यर्थं कविः उत्तमकाव्यनिर्माणं करोति। कीर्तिं, प्रीतिं, आनन्दञ्च आप्नोति। काव्येन कवेः कलानैपुण्यं च एधते। काव्यस्यास्य दृश्यश्रव्यभेदेन प्रकारद्वयम्। तत्र दृश्यकाव्यं रूपकमिति उच्यते। रुपकाणां विवरणत्मक आचार्यधनञ्जयस्य लक्षणग्रन्थः 'दशरुपकम्' सर्वपरिचित एव। दशरुपके आचार्यः धनञ्जयः नाट्यस्वरुपम् एवं विशदयति-

'अवस्थानुकृतिर्नाट्यम्'

धनञ्जयः स्वग्रन्थे दशरूपके अवस्थायाः अनुकरणमेव नाट्यमिति नाट्यलक्षणं वदति।

‘रूपं दृश्यतयोच्यते’

दृष्यते इति कारणात् रूपकम् इति रूपकलक्षणमपि वदति। अस्य रूपकस्य दश प्रकाराः तेन उक्ताः -

नाटकं सप्रकरणं भाणः प्रहसनं डिमः।

व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति

‘दशधैव रसाश्रयम्’ इति धनञ्जयः स्वग्रन्थे दशरूपकान् वदति – नाटकम्, प्रकरणम्, भाणः, प्रहसनम्, डिमः, व्यायोगः, समवकारः, वीथिः, अङ्कः तथा इहामृग। तत्र दशरुपकेषु अन्यतमः रुपकप्रकारः भाणः। भाणस्वरुपमित्थं प्रतिपाद्यते तत्र –

भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा।

यत्रोपवर्णयेदेको निपुणः पण्डितो विटः॥

भाणः दशरूपके तृतीयः प्रभेदः। अत्र आकाशभाषितद्वारा स्वस्य परस्य वा वृत्तं नायको भणतीति भाण इति सार्थकं नाम। भाणः नाट्यस्य एकपात्री प्रयोगः अस्ति। अत्र धूर्तानां नानावस्थं वृत्तान्तस्य वर्णनं भवति। एकाङ्कयुक्तेऽस्मिन् बुद्धिमान् निपुणः विटो नायकः। यद्यपि नटस्य एकत्वात् सम्भाषणं निरवकाशं तथापि आकाशभाषितद्वारा स वचनं प्रतिवचनं च करोति। आकाशभाषितं नाम पात्रं विना आकाशं दृष्ट्वा भाषणम्। भरतीवृत्तिप्रधान भाणः एकांकीप्रयोगः वर्तते।

मातृकाविवरणम्-

हस्तलिखितानि पाण्डुलिपिः, मातृकाः, ग्रन्थाः, हस्तलेखाः, हस्तप्रतिः इति नाम्नापि अभिधीयन्ते। भारतीयकाव्यानां कृतीनाम् वा अन्य विषयाणाम् महान् समूहः अत्र वर्तते। अतः तेषाम् अध्ययनम् आधुनिके काले अत्यावश्यकं वर्तते। हस्तलिखितेषु विहितं गूढज्ञानं ज्ञानपरम्परायाः विषयाश्च लोकोपयोगाय भवन्तु इति उद्देश्येन मातृकाः परिशील्यन्ते।

प्रकृताध्ययने त्रिविक्रमपण्डितविरचितं पंचायुधप्रपंचभाणः नामकं हस्तलिखितं स्वीकृतमस्ति। पंचायुधप्रपंचभाणस्य सप्त मातृकाः प्राप्ताः। मातृकायां प्रदत्तविवरणमादाय तथा विभिन्नमातृकासु पुष्पिकायां कृतोलेखस्य आधारेण स्पष्टमिदं यत् भाणस्य प्रणेता त्रिविक्रमपण्डितः अयं साहित्यमीमांसाशास्त्रनिष्णातस्य त्र्यम्बकपण्डितस्य अनुजः शिष्यश्चासीत्। अस्य जनकः चिद्घनानन्दनाथः, जननी च अनसूया (केनकम्मा) आसीत्। यादवेन्द्रमहोदय-शंकरमन्दारसौरभयोर्ग्रन्थयोः कर्ता च नीलकण्ठस्तत्पुत्रः। पत्नी च पार्वतीस्यात्। एतावदेव त्रिविक्रमस्य विषये ज्ञातं भवति। मातृकायां पुष्पिका एवं प्राप्येत।[२]

त्रिविक्रमकृतामेतां शीतांशुसहजासखः॥

त्रिविक्रमःक्रितिंपायादपायादघसंभवात्॥३३५॥

ॠषिनयनाचलशशिमितशकवर्षेक्रोधनाभिधेशुक्रे॥

यातः सितद्वितीयासुरगुरुदिनएषपूर्णतांभाणः॥३३६॥

इति श्रीत्रिविक्रमपण्डितविरचितपंचायुधप्रपंचोभाणः संपूर्णः॥
जयतिधृतपुंड्रचापश्चरणसरोजानताखिलाशापः॥
पुरहरपुण्यविवर्त्तस्त्रिविक्रमाघौघजंतुसंवर्तः॥१॥ समाप्तः॥ बाळदिनाजी।

त्रिविक्रमइति॥ त्रिविक्रमकविस्तेनकृतांकृतींशीतांशुसहाजातस्याः सखा। त्रिविक्रमः विष्णुः॥ अघसंभवादपायात् पायात्॥३३६॥

शके१७८४ दुंदुभिनामसंवत्सरेमाघकृष्ण १ प्रतिपदायांदीनानाथसुतचिदानंदेनमुंबापुरेसमाप्तोयं ग्रंथः।[३]

पंचायुधप्रपंचभाणस्य एतावता सप्तमातृकाः संशोधकेन अन्विष्टाः सन्ति। तासां प्राप्तिस्थानादि विवरणमत्र प्रस्तूयते -

ग्रन्थनाम	ग्रन्थ कर्ता	प्राप्ति स्थान	भषा	लिपिः	पत्र सङ्ख्या (Folios)	विषय
पञ्चायुधप्रपञ्चख्योभाणः	त्रिविक्रम	आनन्दाश्रम संस्था	संस्कृतम्	देवनागरी	५४	काव्यम्
पंचायुधप्रपंचभाण	त्रिविक्रम	BORI PUNE	संस्कृतम्	देवनागरी	४२	-
Pañcāpradhaprapañca	Trivikrama	Institute of Rajasthan Studies (Janardhanray Nagar Rajasthan Vidyapithaviswavidhy alaya), Udaipur	संस्कृतम्	देवनागरी	७६	काव्यम्
भाणपञ्चायुधप्रपञ्च	त्रिविक्रम	Scindia Oriental Research Institute	संस्कृतम्	देवनागरी	-	-
Pañcāyudhaprapañc	Trivikrama	KRC RTM Nagpur University	संस्कृतम्	देवनागरी	४३	काव्यम्
Pañcayudhaprapañcabhāṇaḥ	Trivikramaḥ	Oriental Research Institute (RR) Mysore	संस्कृतम्	देवनागरी	४९	नाटकम्
Paṅcāyudhaprapaṅcaāṇa	Trivikramaḥ	Oriental Research Institute (RR) Mysore	संस्कृतम्	कन्नडा	४९	नाटकम्

संशोधन आवश्यकता महत्वञ्च –

प्राचीनज्ञानस्य शोधः पुरातनहस्तलिखितमाध्यमेन भवति। तेभ्यः हस्तलिखितेभ्यः गूढज्ञानस्य अवबोधः भवति। प्रभूतानि हस्तलिखितानि संस्कृतभाषायां विरचितानि। तेषु विविधानां शास्त्राणां समावेशः वर्तते।

पुरातनहस्तलिखितमाध्यमेन प्राचीनज्ञानस्य वर्तमानकाले उपादेयता इति संशोधनस्य मुख्योद्दिष्टम्। उपलब्धं हस्तलिखितं रूपकस्य विद्यते तस्मात् दशरूपके भाणनामक रूपकस्य विश्लेषणाय महानाधारः भवेत्। दशरुपकेषु आधिकतया नाटकप्रकरणप्रहसनादि प्रकाराः एव उपलभ्यन्ते। भाणस्य उदाहरणानि अत्यल्पानि किमुत लुप्तप्रायाणि एव। एतादृशसन्दर्भे प्राप्तस्य हस्तलिखितस्य चिकित्सकसम्पादनेन दृश्यकाव्ये अपंर नूतनं भाणसाहित्यम् उपलब्धं भविष्यति तथैव त्रिविक्रमपण्डितस्य योगदानमपि प्रसृतं भविष्यति। तस्मात् अध्ययनस्यास्य आवश्यकता वर्तते।

संशोधनस्य उद्दिष्टम् -

- चिकित्सात्मकपद्धत्या हस्तलिखितस्य सम्पादनम्।
- समीक्षणात्मकपद्धत्या हस्तलिखितस्य अध्ययनम् ।
- पंचायुधप्रपंचभाणस्य गूढज्ञानस्य प्रकाशनम्।
- संस्कृतभाषामाध्यमेन पंचायुधप्रपंचभाणस्य अध्ययनयोग्यतासम्पादनम्।
- प्राचीनहस्तलिखितानां सम्पादनं प्रकाशश्च।
- हस्तलिखितस्य समीक्षणात्मकपद्धत्या एवं तर्कशुद्धाध्ययनेन सरलताया सुलभतया सम्पादनम्।

व्याप्तिः मर्यादा च –

- संशोधनाय स्वीकृतस्य पंचायुधप्रपंचभाण केवलं प्रतिद्वयमादाय पुरा केंद्रीयसंस्कृतविश्वविद्यालयद्वारा प्रकाशनम् अभवत्। तत्र स्वीकृतं हस्तलिखितद्वयं विहाय अन्याः सप्तमातृकाः अत्र अध्ययनाय स्वीकृताः सन्ति। तासु एव अध्ययनमिदं व्याप्तिमस्ति। अपि च प्रकाशिते पुस्तके हस्तलिखितानां केवलं पाठसम्पादनं वर्तते न तु चिकित्सकमध्ययनम्। यदत्र प्रामुख्येन सप्तमातृकाः स्वीकृत्य विधीयते।
- हस्तलिहितेषु कालानुक्रमेण विभाजनं कृत्वा समीक्षणात्मकमध्ययनेन विषय-भषा-प्रतिपादनं च इत्यादीनां घटकानां विचारः क्रियते । प्राप्तेषु पंचायुधप्रपंचभाणेषु हस्तलिखितेतानां पाठसम्पादनम् अत्र क्रियते।

शोधपद्धतिः –

- अस्मिन् संशोधने मुख्यतया पाठसमीक्षणपध्दत्या चिकित्सात्मकमध्ययनं करिष्यते। अपेक्षानुगुणं समीक्षापध्दतेरपि अवलम्बः करिष्यते।
- तदर्थम् आदौ हस्तलिखितानां सङ्कलनं करिष्यते।
- चितानां हस्तलिखितानां पाठसमीक्षणं चिकित्सात्मकपद्धत्या करिष्यते।
- पंचायुधप्रपंचभाणस्य अन्यप्रकाशितविषयानामध्ययनं समीक्षणात्मकपद्धत्या तौलनिकपद्धत्या च करिष्यते।

पूर्वसंशोधनम् -

-
- गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला, नवदेहली, पंचायुधप्रपञ्चभाणः, विंशं प्रसूनम्, श्रीराम मिश्रा. १९८६[४]
- Manuscript Catalogue vol.8, pg.264, column.a, त्रिविक्रम - -- Pañcāyudhaprapañcabhāṇa. composed in 1805 A. D. Bomb. Uni. 2289.[५]
- Hindi Vishva Kosh, Vol 10, By Nagendranath Vasu, 1925 Vishvanath Vasu, Calcutta – त्रिविक्रम पण्डित- पुण्यग्रामके एक विख्यात शास्त्रज्ञ। इन्होंने पञ्चायुधप्रपञ्च नामक संस्कृत भाषा प्रणयन किया है।
- भारतीय कृती सम्पदा- National Mission for Manuscripts.
- केन्द्रीय संस्कृत विश्वविद्यालय https://www.sanskrit.nic.in/
- कर्नाटक संस्कृत विश्वविद्यालयः - https://ksu.ac.in/
- Sampurnanand Sanskrit Vishwavidyalaya Varanasi U.P. - http://apps.ssvvonline.in/

- Kavikulaguru Kalidas Sanskrit University - https://kksanskrituni.digitaluniversity.ac/default.aspx
- Motilal Banarsidass Publishing House (MLBD

अन्तर्जालीयस्रोतांसि -

- https://shodhgangotri.inflibnet.ac.in/
- https://shodhganga.inflibnet.ac.in/
- https://www.worldcat.org/
- https://archive.org/details/books
- https://www.pandulipipatala.nic.in/advance-search - NMM
- https://vmlt.in/
- Sharada Publishing House https://www.sharadabooks.com/
- Motilal Banarsidass Publishing House (MLBD)- https://www.mlbd.in/

एवमाहत्य पूर्वसंशोधने न क्वापि पंचायुधप्रपंचभाणस्य चिकित्सकमध्ययनं सम्पादनञ्च जातमिति दृश्यतेति अवगत्य विषयोऽयं संशोधनाय स्वीकृता।

प्राक्कल्पना –

- पंचायुधप्रपंचभाणस्य समीक्षात्मकम् सम्पादनम्।
- पंचायुधप्रपंचभाणस्य विषयः रुपकलक्षणानुसारि वर्तते।
- दशरुपकेषु भाणप्रकारे पंचायुधप्रपंचभाणस्य योगदानं वर्तते।

प्रकरणविभागः -

उपोद्घातः

प्रथमं प्रकरणम् –

हस्तलिखितशास्त्रपरिचयः तथा दशरूपकपरिचयः।

- ❖ हस्तलिखितशास्त्रपरिचयः
- ❖ दशरूपकपरिचयः
- ❖ भाणपरिचयः
- ❖ भाणवैशिष्ट्यानि
- ❖ हस्तलिखितसम्पादनस्य महत्त्वम्

द्वितीयं प्रकरणम्-

- ❖ पंचायुधप्रपंचभाणपरिचयः
- ❖ लेखकपरिचयः
- ❖ मातृकापरिचयः
- ❖ ग्रन्थवैशिष्ट्यानि

तृतीयं प्रकरणम् –

- ❖ हस्तलिखितपाठसम्पादनम्
- ❖ चिकित्सकमध्ययनम्

चतुर्थम् प्रकरणम् -

- पंचायुधप्रपंचभाणस्य साहित्यिकं समीक्षणम्।

- पंचायुधप्रपंचभाणस्य रीतिः दृष्ट्या समीक्षणम्
- पंचायुधप्रपंचभाणस्य गुणालङ्कारदृष्ट्या समीक्षणम्
- पंचायुधप्रपंचभाणस्य दृष्ट्या समीक्षणम्
- पंचायुधप्रपंचभाणस्य रुपकलक्षणदृष्ट्या समीक्षणम्

पञ्चमम् प्रकरणम् -

❖ सम्प्राप्तानाम् हस्तलिखितानां संक्षिप्तपरिचयः
❖ निष्कर्षः उपसंहारश्च

सन्दर्भसूची -

१. भामहकृत काव्यालङ्काराः २ श्लोकः पृ.
२. त्रिविक्रमपण्डित पंचायुधप्रपञ्चभाणः
३. निवेदनम् पृ. ०२
४. आनन्दाश्रमपुणे, पंचायुधप्रपञ्चभाणः, मातृका ,पुष्पिका
५. गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला, नवदेहली, पंचायुधप्रपञ्चभाणः, विंशं प्रसूनम्, श्रीराम मिश्रा. १९८६.
६. New Catalogus Catalogorum Manuscript Catalogue vol.8, pg.264, column.a, त्रिविक्रम - -- Pañcāyudhaprapañcabhāṇa. composed in 1805 A. D. Bomb. Uni. 2289

सन्दर्भग्रन्थसूची –

- श्री धनञ्जयविरचितम्, दशरूपकम्, रतिराम् शास्त्री, साहित्य भण्डार, सुभाष बजार, मेरठ, १९६९.
- आचार्य भामह विरचित, काव्यालङ्कार, देवेन्द्रनाथ शर्मा, बिहार राष्ट्रभाषा परिषद्, पटना.
- हिन्दी काव्यमीमंसा २०१७, चौखम्बा विद्याभवन वाराणसी, राजशेखर.
- संस्कृत काव्यशास्त्र एवं काव्याङ्ग २०१९, जोधपुर, अरिहन्त प्रकाशन, प्रीतिप्रभा गोयल.
- संस्कृत काव्यशास्त्र का इतिहास १९९४, मोतीलाल बनारसीदास दिल्ली, वी. काणे. पी.
- संस्कृत कवि १९५५, चौखम्बा विद्या भवन, भोलाशंकर व्यास, दर्शन-
- संस्कृत साहित्य का इतिहास उमाशङ्कर शर्मा, ऋषि२०१७, चौखम्भा भारती अकादमी.
- संस्कृत साहित्य का इतिहास २०१७ चौखम्भा विद्याभवन वाराणसी, वाचस्पति गैरोल.
- संस्कृत साहित्य का इतिहास (लौकिक खण्ड), प्रीतिप्रभा गोयल, राजस्थानी ग्रन्थागार, जोधपुर, २०१९.
- संस्कृत साहित्य का संक्षिप्त इतिहास, आचार्य बलदेव उपाध्याय, शारदा संस्थान वाराणसी, १९७२.
- संस्कृत साहित्य का इतिहास, (प्रथम भाग) श्री रामविलास पोदार स्मारक ग्रन्थमाला समिति नवलगढ.
- नाट्यशास्त्र का इतिहास १९९५, चौखम्बा सुरभारती प्रकाशन वाराणसी, पारसनाथ द्विवेदी.
- भारतीय काव्यशास्त्र के सिद्धान्त विनोब, कृष्णदेव शर्मा, पुस्तक मन्दिर २०१५, आगरा.
- संस्कृत वाङमय कोश प्रथम भाग १९८८, भारतीय भाषा परिषद कलकत्ता, श्रीधर भास्कर वर्णेकर.

- संस्कृत वाङमय कोश द्वितीय भाग १९८८, भारतीय भाषा परिषद कलकत्ता, श्रीधर भास्कर वर्णेकर.
- अलंकारशास्त्र की परम्परा "हीरा" राजवंश सहाय, चौखम्बा प्रकाशन वाराणसी २००५.
- काव्यप्रकाश ,आचार्य मम्मट , ज्ञानमण्डल लिमिटेड, १९९८.
- पाण्डुलिपि विज्ञान, डा. सत्येन्द्र , राजस्थान् हिन्दी ग्रन्थ अकादमी, जयपुर.
- Hindi Vishva Kosh, Vol 10, By Nagendranath Vasu, 1925 Vishvanath Vasu, Calcutta.

मार्गदर्शकः

प्रो. परागः जोशी

संस्कृतभाषा-साहित्यविभागः

विभागाध्यक्षः – आधुनिकभाषाविभागः

शोधकर्ता

टि. सुधेशः भट्ट

संस्कृतभाषा-साहित्यविभागः